श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहनुमदष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहनुमदष्टोत्तरशतनामस्तोत्रम् ॥

मनोजवं मारुततुल्यवेगं
    जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं
    श्रीरामदूतं शिरसा नमामि ॥ 1 ॥

यत्र यत्र रघुनाथकीर्तनं
    तत्र तत्र कृतमस्तकाञ्जलिम्।
बाष्पवारिपरिपूर्णलोचनं
    मारुतिं नमत राक्षसान्तकम् ॥ 2 ॥

आञ्जनेयो महावीरो हनूमान्मारुतात्मजः।
तत्वज्ञान प्रदस्सीतादेवी मुद्रप्रदायकः ॥ 3 ॥

अशोकवनिकाच्छेत्ता सर्वमाया विभञ्जनः।
सर्वबन्ध विमोक्ता च रक्षोविध्वंस कारकः ॥ 4 ॥

परविद्यापरीहारः परशौर्य विनाशनः।
परमन्त्रनिराकर्ता परयन्त्र प्रभेदनः ॥ 5 ॥

सर्वग्रहविनाशी च भीमसेन सहायकृत्।
सर्वदुःखहरः सर्वलोकचारी मनोजवः ॥ 6 ॥

पारिजातद्रुमूलस्थः सर्वमन्त्र स्वरूपवान्।
सर्वतन्त्र स्वरूपी च सर्वमन्त्रात्मकस्तथा ॥ 7 ॥

कपीश्वरो महाकायः सर्वरोगहरः प्रभुः।
बलसिद्धिकरस्सर्वविद्या सम्पत्प्रदायकः॥ **8** ॥

कपिसेनानायकश्च भविष्यच्चतुराननः।
कुमार ब्रह्मचारी च रत्नकुण्डलदीप्तिमान्॥ **9** ॥

सञ्चलद्वालसन्नद्ध लम्बमानशिखोज्ज्वलः।
गन्धर्वविद्या तत्त्वज्ञो महाबलपराक्रमः॥ **10** ॥

कारागृहविमोक्ता च शृङ्खलाबन्धमोचकः।
सागरोत्तारकः प्राज्ञो रामदूतः प्रतापवान्॥ **11** ॥

वानरः केसरीसुतः सीताशोक निवारणः।
अञ्जनागर्भ संभूतो बालार्कसदृशाननः॥ **12** ॥

विभीषण प्रियकरो दशग्रीवकुलान्तकः।
लक्ष्मणप्राणदाता च वज्रकायो महाद्युतिः॥ **13** ॥

चिरञ्जीवी रामभक्तो दैत्यकार्य विघातकः।
अक्षहन्ता काञ्चनाभः पञ्चवक्त्रो महातपः॥ **14** ॥

लङ्किणीभञ्जनः श्रीमान् सिंहिकाप्राणभञ्जनः।
गन्धमादनशैलस्थो लङ्कापुर विदाहकः॥ **15** ॥

सुग्रीव सचिवो भीमश्शूरो दैत्यकुलान्तकः।
सुरार्चितो महातेजो रामचूडामणिप्रदः॥ **16** ॥

कामरूपी पिङ्गळाक्षो वार्धिमैनाकपूजितः।
कबळीकृतमार्ताण्ड मण्डलो विजितेन्द्रियः॥ **17** ॥

रामसुग्रीवसन्धाता महिरावणमर्धनः।
स्फटिकाभो वागधीशो नवव्याकृतिपण्डितः॥ **18** ॥

चतुर्बाहुर्दीनबन्धुर्महात्मा भक्तवत्सलः।
सञ्जीवननगाहर्ता शुचिर्वाग्मी दृढव्रतः॥ **19** ॥

कालनेमी प्रमथनो हरिमर्कटमर्कटः।
दान्तश्शान्तः प्रसन्नात्मा दशकण्ठमदापहृत्॥ **20** ॥

योगी रामकथालोलः सीतान्वेषण पण्डितः।
वज्रदंष्ट्रो वज्रनखो रुद्रवीर्य समुद्भवः॥ **21** ॥

इन्द्रजित्प्रहितामोघ ब्रह्मास्त्रविनिवारकः।
पार्थध्वजाग्रसंवासी शरपञ्जर भेदकः॥ **22** ॥

दशबाहुर्लोकपूज्यो जाम्बवत्प्रीतिवर्धनः।
सीतासमेत श्रीराम पादसेवाधुरन्धरः॥ **23** ॥

इत्येवं श्रीहनुमतो नाम्नामष्टोत्तरं शतम्।
यः पठेच्छृणुयान्नित्यं सर्वान्कामानवाप्नुयात्॥ **24** ॥

॥ इति श्रीहनुमदष्टोत्तरशतनामस्तोत्रं समाप्तम्॥